**1.परिसरे समाचरित: गुरुपूर्णिमाकार्यक्रम:** - गुरूणां स्थानं मानवजीवने सर्वोपरि विद्यते, ये स्वजीवने साफल्यमाप्नुवन्त:, तद् गुरुकृपाया: फलमेव। अत: सर्वे केनापि प्रकारेण स्वगुरून् नित्यं स्मरन्ति। वेदेषु अपि गुरो: स्थानं विशिष्टमेव निगदितम्। यथा- आचार्यदेवो भव। अपि च गुरुर्ब्रह्मा गुरुर्विष्णु:, गुरुर्देवो महेश्वर:, गुरु साक्षत् परं ब्रह्म, तस्मै श्रीगुरवे नम:, एवमेव अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया चक्षुरुन्मिलितं येन तस्मै श्रीगुरवे नम: इत्यादिनि पद्यानि गुरो: महत्त्वं प्रतिपादयन्ति। तस्मात्सर्वासु शैक्षणिकसंस्थासु गुरुपूर्णिमाकार्यक्रमस्यायोजनं क्रियते। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरे 13.07.2022 दिनांके अस्य कार्यक्रमस्य आयोजनं नूतनभवनस्य सम्मलेनकक्षे परिसरनिदेशकस्य प्रो.एम्.चन्द्रशेखरमहोदयस्य निर्देशने, वेदविभागाध्यक्षस्य डॉ.शैलेन्द्रप्रसादउनियालमहोदयस्य संयोजकत्वे च समभवत्। सर्वे छात्रा: सम्मलेनकक्षे प्रात:काले एकत्रिता अभवन्, यत्र सर्वे प्राध्यापका: निदेशकमहोदयेन सह विद्यमाना आसन्। सर्वै: छात्रै: सर्वेषां प्राध्यापकानां पुष्पफलादिकं प्रदानेन समर्चना कृता। अवसरेऽस्मिन् परिसरस्य निदेशकेन गुरो महिम्न: महत्त्वस्य विषये स्वविचारा: प्रकटिता:, छात्रैरपि स्वविचारा: प्रस्तुता:। कार्यक्रमस्य सञ्चालनं डॉ.शैलेन्द्रप्रसादउनियालमहोदयेन कृतम्।